NUD9BNZ

# सङ्कलनात्मकं मूल्याङ्कनम् - II (2014-15)

## संस्कृतम् - अम्नं षर गात्मकम्

## कक्षा - नवमी

**समय : होरात्रयम्** **पूर्णाङ्काः 90**

**निर्देशाः**

(i) प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

| | | |
|---|---|---|
| खण्डः (क) अपठित-अ वबोधनम | - | 10 अङ्काः |
| खण्डः (ख) रचनात्मक-व ार्यम | - | 15 अङ्काः |
| खण्डः (ग) अनुप्रयुक्त-व्याकरणम् | - | 30 अङ्काः |
| खण्डः (घ) पठित-अ वबोधनम | - | 35 अङ्काः |

(ii) सर्वे प्रश्नाः अनिवार्याः।

(iii) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।

(iv) प्रश्नसं ख्या अवश्यमेव लेखनीया।

(v) उत्तराणि संस्कृतेनैव लेखनीयानि।

## खण्ड : 'क'

## अपठित-अ वबोधनम्- (10 अङ्काः)

1 **अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत।(2+2+4+2)** 10

श्रवणकुमारः पितृभक्तः बालः आसीत्। तस्य मातापितरौ वृद्धौ नेत्रहीनौ च आस्ताम्। तयोः इच्छापूर्त्यै श्रवणः तौ तीर्थयात्रायै अनयत्। एकदा मार्गे तौ पिपासाकुलौ जातौ। श्रवणकुमारः तौ वृक्षस्य अधः अवस्थाप्य जलम् आनेतुम् नदीतटम् अगच्छत्। यथा सः जलपूरणाय पा त्रम् नद्याः जले अपातयत् तदा ध्वनिः अभवत्। दूरे अयोध्यायाः नृपः दशरथः आखेटाय विचरन् आसीत्। जलस्य शब्दं श्रुत्वा सः अचिन्तयत् यत् कश्चित् पशुः जलं पिबति। सः शब्दवेधिबाणम् अक्षिपत्। बाणेन श्रवणस्य हृदयं विद्धम्। सः उच्चैः अक्रन्दत्। दशरथः शब्दम् प्रति अधाव त्। इदं दृष्ट्वा सः नितराम् दुःखी अभवत् यत् तस्य बाणेन एकः बालः हतः। श्रवणकुमारः दशरथम् अवदत्-'' मम मातापितरौ

पिपासाकुलौ स्तः कृपया तौ जलम् पायय।''

I. **एकपदेन उत्तरत।**

(i) श्रवणकुमारः कीदृशः बालः आसीत्?

(ii) श्रवणस्य हृदयं केन विद्धम्?

II. **पूर्णवाक्येन उत्तरत।**

(i) श्रवणकुमारः दशरथम् किम् अवदत्?

(ii) जलस्य शब्दं श्रुत्वा दशरथः किम् अचिन्तयत्?

III. **निर्देशानुसारम् उत्तरत।**

(i) 'अगच्छत्' इति क्रियापदस्य कर्ता कः?

(अ) श्रवणकुमारः (ब) दशरथः

(स) नृपः (द) बालः

(ii) 'तस्य माता पितरौ ---' । अत्र तस्य सर्वनामपदं कस्मै प्रयुक्तम्?

(अ) नृपाय (ब) दशरथाय

(स) पित्रे (द) श्रवणकुमाराय

(iii) 'समीपे' अस्य विलोमपदं गद्यांशे किम् प्रयुक्तम्?

(अ) मार्गे (ब) दूरे

(स) श्रुत्वा (द) उच्चैः

(iv) 'आकर्ण्य' अस्य किं पर्यायपदं गद्यांशे प्रयुक्तम्?

(अ) श्रुत्वा (ब) दृष्ट्वा

(स) उच्चैः (द) दूरे

IV. **अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।**

## खण्डः 'ख'

## रचनात्मक व नार्यम् (15 अङ्काः)

2 भवान् उमाकान्तः। दण्डक्षमापनार्थं प्राचार्यं प्रति प्रार्थनापत्रम् लिखत। 5

(i) ..........

विश्वभारतीविद्यालयः

नेहरू नगर,

(ii) ..........

सेवायां (iii) .......... अस्ति यत् अहमस्मिन विद्यालये नवमकक्षायां (iv) ..........। ह्यः (v) .......... परीक्षा आसीत्, परम अहम् आवश्यककार्यवशात् (vi) .......... आसम। अध्यापकेन पञ्चाशतरूप्यकैः (vii) .......... । श्रीमन्तः अहं (viii) .......... आसम् कृपया मम अर्थदण्डः (ix) .......... इति प्रार्थ्यन्ते भवन्तः।

भवदीय : (x) ..........

उमाकान्तः

अनु. 18

**मञ्जूषा : श्रीमन्तः, मम, पठामि, दण्डितः, शिष्यः, क्षन्तव्यः, निवेदनम्, विवशः, अनुपस्थितः, प्रधानाचार्यमहोदय।**

3 मञ्जूषायां प्रदत्तशब्दानां सहायतया चित्रं दृष्ट्वा पञ्च वाक्यानि संस्कृतेन लिखत। (2x5=10) 10



मञ्जूषा

**दीपमालिकोत्सवः, दीपानाम्, पंक्तिः, जनाः, रात्रौ, विजयप्रतीकः, वितरन्ति, पूरयन्ति, स्फोटयन्ति, अन्धकारः, क्रीडा, महिले, हस्ते, पूजनसामग्रीम्, द्वारम्, लक्ष्मीम्**

अथवा

**'मम प्रियः अध्यापकः'** इति विषयम् अधिकृत्य मञ्जूषातः शब्दान् चित्वा संस्कृतभाषया (2x5=10) 10

पञ्चवाक्यानि लिखत।

**मञ्जूषा–अध्यक्षः, परीक्षापरिणामः, सौम्यः, मृदुभाषी, संस्कृतभाषायाः आदर्शवान्, त्यागशीलः, शतप्रतिशतम्, पाठयति, वक्ता, व्यवहारः, सत्यम्, विद्वान्।**

## खण्डः 'ग'

## अनुप्रयुक्त व्याकरणम् - (30 अङ्काः)

4 उचितशब्दरूपाणि चित्वा रिक्तस्थानानि पूरयत। 6

(i) हे ...................... ! भवान् आदेशं यच्छतु।

(अ) राजा (ब) राज्ञा (स) राजन् (द) राज्ञे

(ii) देहस्य नाशेन ...................... नाशः न भवति।

(अ) आत्मनः (ब) आत्मा (स) आत्मानम् (द) आत्मने

(iii) ..................... बुद्धिप्रयोगेण सर्वासां समस्यानां समाधानं कर्तुं शक्नुवन्ति।

(अ) भवताम् (ब) भवन्तः (स) भवद्भिः (द) भवद्भ्यः

(iv) ..................... स्वधर्मेण विचलिताः न भवन्ति।

(अ) विद्वांसम् (ब) विद्वान् (स) विदुषः (द) विद्वांसः

(v) न्यायप्रियस्य ....... ............. यशः लोके प्रसरति।

(अ) राज्ञा (ब) राज्ञः (स) राज्ञि (द) राज्ञे

(vi) त्वं जन्तुशालायाः बहिः ..................... यानान्ः पश्य।

(अ) गच्छन्तः (ब) गच्छत ् (स) गच्छतः (द) गच्छन्तम्

5 उचितसंख्यापदैः रिक्त स्थानानि पूरयत। 6

(i) .................. सूर्यः तमः हन्ति। (एक)
(ii) .................. कन्ये लिखतः। (द्वि)
(iii).................. महिलाः भोजनं पचन्ति। (त्रि)
(iv).................. वानराः कूर्दन्ति। (चतुर्)
(v) गङ्गायाः तीरे .. .................. वृक्षाः सन्ति। (पञ्चन्)
(vi) वेदाः .. ..................... सन्ति। (चतुर्)

6 प्रदत्तविकल्पेभ्यः उचितधातुरूपाणि चित्वा रिक्तस्थानानि पूरयत। 6

(i) छात्राः सदा जागरूकतया अध्ययनं .. ............ ।

(अ) कुर्यात् (ब) कुर्याम
(स) कुर्युः (द) कुर्याव

(ii) ते बालिके भोजनं ................ ।

(अ) भक्षयतम् (ब) भक्षय

(स) भक्षयतु (द) भक्षयताम्

(iii) जनेभ्यः व्यायामः .. ............ ।

(अ) रोचेरन् (ब) रोचेयाथाम्

(स) रोचेय (द) रोचेत

(iv) बालाः ज्ञानं ग्रहीतुम् .. ............... ।

(अ) इच्छतु (ब) इच्छन्तु

(स) इच्छत (द) इच्छाम

(v) त्वम् कर्म कुर्याः, भिक्षां न .. ............... ।

(अ) याचेथाः (ब) याचेत

(स) याचय (द) याचेध्वम्

(vi) युवां शाकानि गृहं ............... ।

(अ) नय (ब) नयतु

(स) नयतम् (द) नयताम्

7 **उचित-उपपदविभक्तीनां प्रयोगं रिक्तस्थानेषु कुरुत।** 6

(i) अयम् आचार्यः .. ............ अलम्।

(अ) शिष्येभ्यः (ब) शिष्येण

(स) शिष्यात् (द) शिष्यान्

(ii) ............... वामतः हृदयः भवति।

(अ) शरीरात् (ब) शरीरम्

(स) शरीरस्य (द) शरीरेण

(iii) तेन .. ............. किम् येन सः सफलः न भवति।

(अ) अध्ययनस्य (ब) अध्ययनात्

(स) अध्ययनेन (द) अध्ययनम्

(iv) सः .. ............ विश्वसिति।

(अ) विद्वांसः (ब) विदुषा

(स) विद्वांसम् (द) विद्वत्सु

(v) ............... आरभ्य युवावस्थापर्यन्तं बालकाः शिक्षां प्राप्नुवन्ति।

(अ) बाल्यकालस्य (ब) बाल्यकालेन

(स) बाल्यकालात् (द) बाल्यकालाय

(vi) ............... धिक् यः परेषां धनं चोरयति।

(अ) चौरस्य (ब) चौरम्

(स) चौरेण (द) चौरात्

8 अधोलिखितेषु वाक्येषु प्रकृतिप्रत्ययौ संयोज्य विभज्य वा प्रदत्तविकल्पेभ्यः चित्वा लिखत। 6

(i) दुग्धं <u>पिबन्</u> शिशुः हसति।

(अ) पा + शानच् (ब) पा + क्त

(स) पा + क्तवतु (द) पा + शतृ

(ii) अस्माभिः गीता .. ...............॥ (श्रु + क्त)

(अ) श्रुतः (ब) श्रुतम्

(स) श्रुता (द) श्रुताम्

(iii) ................... महिलाः वार्तालापं कुर्वन्ति। (पच् + शतृ)

(अ) पचन्ती (ब) पचन्त्यौ

(स) पचन्त्यः (द) पचन्तः

(iv) वयं भोजनं ..................। (खाद् + क्तवतु)

(अ) खादितवान् (ब) खादितवन्तौ

(स) खादितवन्तः (द) खादितवती

(v) <u>वर्धमानः</u> चन्द्रः कं न प्रसीदति।

(अ) वृध् + शतृ (ब) वृध् + शानच्

(स) वर्ध् + क्त (द) वर्ध् + क्तवतु

(vi) <u>मोदमाना</u> कन्या नृत्यति।

(अ) मुद् + शतृ (ब) मुद् + क्त

(स) मुद् + शानच् (द) मुद् + क्तवतु

## खण्ड : 'घ'

## पठित-अवबोधनम्- 35 अङ्काः

9 अधोलिखितं गद्यांशं पठित्वा प्रदत्त-प्रश्नानां उत्तराणि लिखत(2+1+2) 5

इत्युक्त्वा मात्रा अनुमतः अष्टावक्रः राजसभां गतः। कथमपि सभायां लब्धप्रवेशः स राजानं सविनयं प्राणमत् । तस्य वक्रदेहं वीक्ष्य सभास्थिताः पण्डिताः तारस्वरेण अहसन्। '' एष बालः अस्माभिः सह शास्त्रार्थम् अपि करिष्यति" इति ज्ञात्वा ते अन्योन्यं पश्यन्तः स्मितम् अकुर्वन्। तेषां पण्डितानां चेष्टितं दृष्ट्वा अष्टावक्रः

उच्चै: हासितुम् आरभत।

I. एकपदेन उत्तरत

(i) अष्टावक्र: कुत्र गत:?

(ii) बक्रदेहम् अष्टावक्रं दृष्ट्वा के तारस्वरेण अहसन्?

II. एकवाक्येन उत्तरत

अष्टावक्र: किमर्थम् उच्चै: अहसत्?

III. भाषिक- कार्यम्-

(i) 'दृष्ट्वा' इत्यस्य पर्यायपदं किमत्र ?

(अ) उक्त्वा (ब) वीक्ष्य

(स) ज्ञात्वा (द) अनुमत:

(ii) 'पण्डिता:' इति पदस्य किम् क्रियापदम् अस्ति?

(अ) अहसन् (ब) अकुर्वन्

(स) करिष्यति (द) आरभत

10 निम्नलिखितं पद्यांशं पठित्वा प्रश्नान् उत्तरत :-(2+1+2) 5

निम्ब! त्वदीयकटुता यदि दाहहन्त्री,

गायन्तु मूढमनुजास्तव दोषगाथा:।

तप्तास्त एव तपनोपमपित्ततापै:

गास्यन्ति मित्रवर! तावकगीतकानि।

I. एकपदेन उत्तरत।

(i) निम्बस्य कटुता कीदृशी गुणकरी कथिता ?

(ii) जना: कै: तप्ता: भवन्ति ?

II. पूर्णवाक्येन उत्तरत। निम्बस्य दोषगाथा: तु के गायन्ति?

III. भाषिककार्यम्-

(i) 'गुणगाथा:' अस्य विपर्ययपदम् लिखत।

(अ) मित्रवर (ब) कटुता

(स) एव (द) दोषगाथा:

(ii) 'मूर्खजना: अस्य पदस्य पर्यायपदम् किं प्रयुक्तम् ?'

(अ) दोषगाथा: (ब) त्वदीयइति

(स) मूढमनुजा: (द) मुनजा:

11 अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत।(2+1+2) 5

नगरपाल: (तन्तुवायं प्रति) भो: किमेतत् करोषि ?

तन्तुवाय: महाशय! अहं त्रुटितान् तन्तून् संयोजयामि।

नगरपाल: किं पठितोऽसि ?

तन्तुवाय: आम्, मया गुरुकुले शिक्षा गृहीता।

नगरपाल: किं काव्यरचनां जानासि ?

तन्तुवाय: पश्यतु एव भवान्। तन्तुसंयोजने व्यग्रोऽहं कथं काव्यं कुर्याम् ?

नगरपाल: तर्हि त्वया मया सह राजसभां गन्तव्यम्।

तन्तुवाय: प्रसीदतु भवान्! तत्र गत्वा किं करिष्यामि। दयस्व, मयि दयस्व। तत्र गमनेन मम कार्यहानि: भविष्यति।

नगरपाल: नाहं जाने। त्वया गन्तव्यमेव। एष राजादेश:। विसृज कार्यम्। झटिति आगच्छ मया साकम्।

तन्तुवाय: राजादेश इति। गन्तव्यमेव, नास्ति उपाय:। चलामि नगरपालक! चलामि।

I. एकपदेन उत्तरत।

(i) क: त्रुटितान् तन्तून् संयोजयति स्म ?

(ii) तन्तुवायेन कुत्र शिक्षा गृहीता ?

II. पूर्णवाक्येन उत्तरत।।

तन्तुवाय: किमर्थं राजसभां गन्तुं न इच्छति?

III. भाषिककार्यम्।।

(i) 'गन्तव्यम्' इत्यस्य कर्तृपदं किम् ?

(अ) त्वया (ब) मया

(स) सह (द) राजसभां

(ii) 'शीघ्रम्' इत्यर्थे किं पदम् आगतम् ?

(अ) साकम् (ब) झटिति

(स) तर्हि (द) विसृज

12 अधोलिखितश्लोकयोः अन्वयं कुरुत- ( ½ x 10 =5) 5

( क ) निम्ब ! त्वदीयकटुता यदि दाहहन्त्री,

गायन्तु मूढमनुजास्तव दोषगाथाः।

तप्तास्त एव तपनोपमपित्ततापैः

गास्यन्ति मित्रवर! तावकगीतकानि।।

अन्वयः – (i)_______ त्वदीयकटुता यदि दाहहन्त्री (ii) ______ तव (iii) ______ गायन्तु।

मित्रवर! (iv) _______ तप्ताः ते एव तावकगीतकानि (v) ______ ।

( ख ) मूलं भुजङ्गैः शिखरं प्लवङ्गैः शाखा विहंगैः कुसुमानि भृङ्गैः।

नास्त्येव तच्चन्दनपादपस्य यन्नाश्रितं सत्वभरैः समन्तात्।।

अन्वयः – भुजङ्गैः (i) _______ प्लवङ्गैः (ii) ______ विहंगैः (iii) ______ भृङ्गैः कुसुमानि

(आश्रितानि) (iv) _______ तत् न एव अस्ति यत् समन्तात् (v) ______ न आश्रितम्।

13 रेखांकितानि पदानि आधृत्य प्रश्न निर्माणं कुरुत 5

(i) वृक्षाः परेभ्यः उपकारं कुर्वन्ति।

(ii) वृक्षः सर्वस्य सुखस्य हेतोः सर्वम् अर्पयति।

(iii) मूढमनुजाः निम्बस्य दोषगाथाः गायन्तु।

(iv) आम्रस्य पुष्पसौरभफलप्रचुराः दिवसाः गताः।

(v) वृक्षः धर्मव्यथां हरति।

14 अधोलिखितानि वाक्यानि कथाक्रमेण संयोज्य लिखत (½ x 10 = 5) 5

(1) एकदा मुनिः क्वापि नगरे एकं ब्राह्मणगृहं गत्वा ब्राह्मणीं भिक्षामयाचत्।

(2) मुनिः क्रुद्धस्तां व्यलोकयत्।

(3) सः मुनिः तां कोपदृष्ट्या दृष्टवान्।

(4) एकदा एका बलाका तस्योपरि विष्ठाम् उदसृजत्।

(5) दृष्टमात्रैव सा बलाका भस्मसादभूत्।

(6) सा पतिव्रता गृहिणी तम् अवदत् - ''प्रतीक्षस्व क्षणं यावत् भर्तुः परिचर्यां समापये।''

(7) सा विहस्य अवदत् - ''मुने! न अहं बलाकेति''।

(8) आसीत् पुरा कोऽपि महातपा नाम वनवासी मुनिः।

(9) सः तस्य उपदेशं श्रुत्वा आत्मज्ञानं प्राप्तवान्।

(10) पतिव्रता तं मांसविक्रयिणः धर्मव्याधस्य समीपे प्रेषितवती।

15 **रेखाङ्कितशब्दानाम् अर्थान् विकल्पेभ्यः चित्वा लिखत।** 5

(i) छायाम् <u>अन्यस्य</u> कुर्वन्ति।

(अ) परेषाम् (ब) द्वितीयं (स) इव

(ii) वृक्षाः स्वयम् <u>आतपे</u> तिष्ठन्ति।

(अ) विपत्ति (ब) घर्मे (स) तूफान

(iii) सर्व-प्राणि-<u>उपजीवनम्</u>।

(अ) जन्म (ब) आश्रयः (स) तिठन्ति

(iv) येभ्यो निराशा <u>यान्ति</u> नार्थिनः।

(अ) यच्छति (ब) यज्ञ (स) गच्छन्ति

(v) गन्ध-<u>निर्यास</u>-भस्मास्थितोक्मैः कामान्वितन्वते।

(अ) वृक्षरस (ब) निराशा (स) निर्गच्छति